QJ758P

# महर्षिः दधीचिः



भारतीया संस्कृतिः सर्वश्रेष्ठा संस्कृतिः अस्ति। दानं, दया, समता परोपकारः इत्यादयो गुणाः भारतीयसंस्कृतेः अङ्गानि सन्ति। स्वार्थं परित्यज्य परोपकारार्थं जीवनसमपर्णेन अनेके मुनयः, महर्षयः राजानः सामान्यनागरिकाश्च भारतीयसंस्कृतिम् अरक्षन् अतएव ते सादरं स्मर्यन्ते। अतिथिरक्षायै करस्थं स्थालं प्रयच्छन् राजर्षिरन्तिदेवः कपोतरक्षायै स्वदेहमान्सं ददानो महाराजः शिविः, देवरक्षायै स्वशरीरस्यास्थीनि प्रयच्छन् महर्षिदधीचिश्चैतादृशा एवं श्रद्धेयाः स्मरणीयाः महापुरुषाः सन्ति।

महर्षेः दधीचेः नाम सर्वेषु परोपकारिषु महापुरुषेषु अग्रगण्यः मन्यते। देवराजेन्द्रस्य परीक्षायामुत्तीर्णो रन्तिदेवः शिविश्च उभौ अपि अन्ते देहवन्तौ जीवितौ आस्ताम्। किन्तु दधीचिस्तु सर्वकालाय देहं विमुच्य यशशरीरो अभवत्। वस्तुतः तत्समस्त्यागी न भूतो न भविष्यति।

प्राचीनकाले कदाचिद् देवानां दानवानां च भयङ्करसंग्रामोऽभूत्। तस्मिन् सङ्ग्रामे देवानां नायकः इन्द्रः दानवानां नायकश्च वृत्रासुरः आसीत्। वृत्रासुरेण सह संघर्षे देवनायकः इन्द्रः पराजितः इन्द्रस्यादेशेन पराजिताः देवाः देवरक्षकं भगवन्तं विष्णुम् उपगम्य स्वरक्षायै प्रार्थयन्। प्रार्थनां श्रुत्वा प्रसन्नो भगवान् विष्णुः अब्रवीत् यत् वरं ब्रुवत देवाः अब्रुवन् – भगवन! दानवानां नायको वृत्रासुरः देवराजस्य इन्द्रस्य सकलां देवसेनां पराजयत स दानवराजोऽस्माकं सर्वाणि शस्त्राणि अपि अनश्यत्। भवान् अस्मान् रक्षतु।

भगवान् विष्णुः उवाच भो देवाः! इदानीं महर्षिः दधीचिः सर्वेषाम् ऋषीणां शिरोमणिः वर्तते। व्रतोपवासैः तपसा च तस्य महात्मनो देहः पावनः सम्पन्नः। तस्य देहस्य अस्थिभिः यदि वज्रस्य निर्माणं भवेत् तर्हि तेन वज्रेण वृत्रासुरस्य वधः संभवोऽस्ति। अतः सत्वरं गत्वा तं महर्षिं तद्देहं याचत। स ऋषिधर्मस्य मर्मज्ञो वर्तते। ऋषयः खलु परोपकारिणो भवन्ति। सः परोपकारार्थं अवश्यं स्वदेहं दास्यति।

भगवतो विष्णोः आदेशेन देवाः महर्षेः दधीचेः समीपं गतवन्तः।तत्र गत्वा ते वृत्रासुरस्य अत्याचारं वर्णयित्वा तद्वधाय महर्षेः देहम् अयाचन्। दधीचिः उवाच–भो देवाः! यो नरः शरीरं क्षणभङ्गुरं मत्वा अपि सनातनस्य धर्मस्य पालनं न करोति, स सर्वदा निन्दनीयो भवति। नदी वृक्षादयो जडपदार्था अपि तं स्वार्थिनं निन्दन्ति। यः खलु प्राणिनां शोके शोकं, हर्षेहर्षं च अनुभवति स एव प्रशंसनीयो भवति। अतः देवकार्याय शरीरं मुञ्चतो लेशतोऽपि व्यथा न भविष्यति।

एवमुक्त्वा महर्षिः दधीचिः भगवन्तं ध्यायन् स्वदेहम् अत्यजत्। देवशिल्पी विश्वकर्मा तैः अस्थिभिः वज्रस्य निर्माणम् अकरोत्। तेन वज्रेण देवराज इन्द्रो वृत्रासुरस्य वधं चकार। एतेन महता त्यागमहिमभ्यां महर्षिः दधीचिः अद्यापि सादरं सम्मानयते, यशः शरीरेण च अद्यापि जीवति।

'परोपकाराय सतां विभूतयः'

## शब्दार्थाः

स्मर्यन्ते = स्मरण करते हैं। करस्थम् = हाथ में स्थित। स्थालम् = थाली को। ददानो = देते हुए। देहवन्तौ = शरीरधारी। विमुच्य = छोड़कर। उपगम्य = पास जाकर। सकलाम् = समस्त। अनश्यत् = नष्ट कर दिया। शिरोमणि = श्रेष्ठ या प्रमुख। वज्र = कठोर (अस्त्र का नाम)। तर्हि = तो। मर्मज्ञ = विशेषज्ञ या मर्म को जानने वाला। अयाचन् = मांगे। क्षणभङ्गुरं= नाशवान। मुञ्चतो = छोड़ते हुए। लेशतोऽपि = थोड़ा भी। चकार = किया।

## अभ्यासप्रश्नाः

(1) संस्कृत में उत्तर दीजिए–

(क) परोपकारेषु कस्य नाम अग्रगण्यं मन्यते ?

(ख) दानवानां नायकः कः आसीत् ?

(ग) इन्द्रस्यादेशेन देवाः किम् अकुर्वन् ?

(घ) केन वज्रः निर्मितः ?

(2) रिक्त स्थानों की पूर्ति कीजिए–

(क) प्राचीनकाले देवानां दानवानां ................अभूत्।

(ख) प्रार्थनां श्रुत्वा प्रसन्नो .................... अब्रवीत्।

(ग) ऋषयः खलु .................... भविन्त।

(घ) तेन ................... वृत्रासुरस्य वधः संभवोऽस्ति।

(3) संस्कृत में अनुवाद कीजिए :–

(क) देवों और दानवों का संग्राम हुआ।

(ख) भगवन! आप हमारी रक्षा करें।

(ग) परोपकार सज्जनों का धन है।

(घ) इन्द्र ने वृत्रासुर का वध किया।

(4) सन्धि कर प्रकार लिखिए –

(1) परोपकारः (2) शिविश्च (3) व्रतोपवासैः (4) महर्षिः

(5) समास विग्रह कीजिए :–

(1) कपोतरक्षायै (2) देवनायकः (3) वज्रनिर्माणम्

(6) (1) देव अकारान्त पुल्लिङ्ग एवं 'महर्षि' इकारान्त पुल्लिङ्ग की कारक रचना सभी विभक्तियों में लिखिए।

(2) भू–धातु के लङ्लकार में धातुरूप लिखिए।

(3) ''दा''–धातु के लृट्लकार में धातुरूप लिखिए।

QJG1AC